श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीवेङ्कटेशस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवेङ्कटेशस्तोत्रम् ॥

कमलाकुचचूचुक कुङ्कुमतो नियतारुणितातुलनीलतनो।
कमलायतलोचन लोकपते विजयी भव वेङ्कटशैलपते॥ १ ॥

सचतुर्मुखषण्मुखपञ्चमुखप्रमुखाखिलदैवतमौलिमणे।
शरणागतवत्सल सारनिधे परिपालय मां वृषशैलपते॥ २ ॥

अतिवेलतया तव दुर्विषहैरनुवेलकृतैरपराधशतैः।
भरितं त्वरितं वृषशैलपते परया कृपया परिपाहि हरे॥ ३ ॥

अधिवेङ्कटशैलमुदारमतेर्जनताभिमताधिकदानरतात्।
परदेवतया गदितान्निगमैः कमलादयितान्न परं कलये॥ ४ ॥

कलवेणुरवावशगोपवधूशतकोटिवृतात्स्मरकोटिसमात्।
प्रतिवल्लविकाभिमतात्सुखदात् वसुदेवसुतान्न परं कलये॥ ५ ॥

अभिरामगुणाकर दाशरथे जगदेकधनुर्धर धीरमते।
रघुनायक राम रमेश विभो वरदो भव देव दयाजलधे॥ ६ ॥

अवनीतनयाकमनीयकरं रजनीकरचारुमुखाम्बुरुहम्।
रजनीचरराजतमोमिहिरं महनीयमहं रघुराममये॥ ७ ॥

सुमुखं सुहृदं सुलभं सुखदं स्वनुजं च सुकायममोघशरम्।
अपहाय रघूद्वहमन्यमहं न कथञ्चन कञ्चन जातु भजे॥ ८ ॥

विना वेङ्कटेशं न नाथो न नाथः सदा वेङ्कटेशं स्मरामि स्मरामि।
हरे वेङ्कटेश प्रसीद प्रसीद प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ॥ ९ ॥

अहं दूरतस्ते पदाम्भोजयुग्म प्रणामेच्छयाऽऽगत्य सेवां करोमि।
सकृत्सेवया नित्यसेवाफलं त्वं प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश॥ १० ॥

अज्ञानिना मया दोषान् अशेषान् विहितान् हरे।
क्षमस्व त्वं क्षमस्व त्वं शेषशैलशिखामणे॥ ११ ॥

॥ इति श्रीवेङ्कटेशस्तोत्रम् समाप्तम्॥